M-517

संस्कृत (22)

~~अध्यात्म पूजा~~

पान : १

निर्वाणषट्क शंकराचार्य विरचित
श्री. वा. गोसावी लिखितेन

M-517

१ अध्यात्मप्रकाश ।। चार्य कृत चित । निर्वाणषट्क डा० वा० गोसावी

ॐ।। मनोबुध्यहंकार चित्तानि नाहं नश्रोत्रं न जिव्हा त्वच घ्राणनेत्रं ।। न च व्योमभू
मिर्न तेजो न वायु श्चिदानंदरूपः शिवोहं शिवोहं ।।१।। अहं प्राण संज्ञा न ते पंचवायु
र्न वारिन्नवा सप्तधातुर्न कोशाः ।। न वाक् पाणिपादौ न चोपस्थपायु श्चि०।।२।। न
पुण्यं न पापं न सौख्यं न दुःखं न मंत्रो न तीर्थो न मे दान यज्ञाः ।। अहं भोजनं नैव भो
ज्यं न भोक्ता श्चिदा०।।३।। न मे द्वेषरागौ न मे लोभमोहौ मदा नैव मे नैव मात्सर्य
भावः ।। न धर्मो न चार्थो न कामो न मोक्ष श्चिदा०।।४।। न मृत्युर्न शंका न मे जाति
भेदा पिता नैव मे नैव माता न जन्मः ।। न बंधुर्न मित्रं गुरुर्नैव शिष्य श्चिदा०।।५।। अ
हं निर्विकल्पो निराकाररूपो विभू व्याप्य सर्वत्र सर्वेंद्रियाणि ।। न चासंमतं नैव मु
क्तिर्वचोभि श्चिदा०।।६।। इति श्रीमच्छंकराचार्यविरचितं निर्वाणषट्कं संपूर्णं ।।७।।

१

ॐ॥ पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनं॥ स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः॥१॥
निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च॥ निर्लेपस्य कुतो गंधो रम्यस्याभरणं कुतः॥२॥
निरालंबस्योपवीतं पुष्पं निर्वासनस्य च॥ नित्यतृप्तस्य नैवेद्यं तांबूलं तु कुतो विभोः॥३॥ प्रद
क्षिणमनंतस्याद्वितीयस्य कुतो नतिः॥ स्वयंप्रकाशमानस्य कुतो निरांजनं विभोः॥४॥ वेदवाक्य
मवेद्यस्य कुतः स्तोत्रं विधीयते॥ अंतर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत्॥५॥ इयमेव परा पू
जा सर्वावस्थासु सर्वदा॥ प्रेमभक्त्या तु विश्वेशं मनसैव निवेदयेत्॥६॥ अध्यात्मपूजा संपूर्णा॥
प्रतिष्ठा श्वकरी विष्ठा गौरवं रौरवं तथा॥ अभिमानं सुरापानं त्रयं त्यक्त्वा सुखी भवेत्॥१॥
हरिं हरितकिं चैव गायत्रिं च दिने दिने॥ मोक्षारोग्यतपःकामी चिंतनीये द्विजे जपेत्॥२॥